श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### एकादशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## एकादशः सर्गः

*नासौ सीतेति निश्चित्य हनुमता पुनरन्तःपुरे पानभूमौ च सीताया अनुसन्धानं तन्मनसि धर्मलोपाशङ्का तस्याः स्वतो निवारणं च*

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा।
जगाम चापरां चिन्तां सीतां प्रति महाकपिः॥ ५.११.१ ॥

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी।
न भोक्तुं नाप्यलङ्कर्तुं न पानमुपसेवितुम्॥ ५.११.२ ॥

नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम्।
न हि रामसमः कश्चिद् विद्यते त्रिदशेष्वपि॥ ५.११.३ ॥

अन्येयमिति निश्चित्य भूयस्तत्र चचार सः।
पानभूमौ हरिश्रेष्ठः सीतासन्दर्शनोत्सुकः॥ ५.११.४ ॥

क्रीडितेनापराः क्लान्ता गीतेन च तथापराः।
नृत्येन चापराः क्लान्ताः पानविप्रहतास्तथा॥ ५.११.५ ॥

मुरजेषु मृदङ्गेषु चेलिकासु च संस्थिताः।
तथाऽऽस्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः॥ ५.११.६ ॥

अङ्गनानां सहस्रेण भूषितेन विभूषणैः।
रूपसंलापशीलेन युक्तगीतार्थभाषिणा॥ ५.११.७ ॥

देशकालाभियुक्तेन युक्तवाक्याभिधायिना।
रताधिकेन संयुक्तां ददर्श हरियूथपः॥ ५.११.८ ॥

www.prapatti.com

अन्यत्रापि वरस्त्रीणां रूपसंलापशायिनाम्।
सहस्रं युवतीनां तु प्रसुप्तं स ददर्श ह॥ ५.११.९ ॥

देशकालाभियुक्तं तु युक्तावाक्याभिधायि तत्।
रताविरतसंसुप्तं ददर्श हरियूथपः॥ ५.११.१० ॥

तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः।
गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः॥ ५.११.११ ॥

स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम्।
करेणुभिर्यथारण्ये परिकीर्णो महाद्विपः॥ ५.११.१२ ॥

सर्वकामैरुपेतां च पानभूमिं महात्मनः।
ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे॥ ५.११.१३ ॥

मृगाणां महिषाणां च वराहाणां च भागशः।
तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः॥ ५.११.१४ ॥

रौक्मेषु च विशालेषु भाजनेष्वप्यभक्षितान्।
ददर्श कपिशार्दूलो मयूरान् कुक्कुटांस्तथा॥ ५.११.१५ ॥

वराहवार्ध्राणसकान् दधिसौवर्चलायुतान्।
शल्यान् मृगमयूरांश्च हनुमानन्ववैक्षत॥ ५.११.१६ ॥

कृकलान् विविधांश्छागाञ्छशकानर्धभक्षितान्।
महिषानेकशल्यांश्च मेषांश्च कृतनिष्ठितान्॥ ५.११.१७ ॥

लेह्यानुच्चावचान् पेयान् भोज्यान्युच्चावचानि च।
तथाम्ललवणोत्तंसैर्विविधै रागखाण्डवैः॥ ५.११.१८ ॥

महानुपुरकेयूरैरपविद्धैर्महाधनैः।
पानभाजनविक्षिप्तैः फलैश्च विविधैरपि॥ ५.११.१९ ॥

कृतपुष्पोपहारा भूरधिकां पुष्यति श्रियम्।
तत्र तत्र च विन्यस्तैः सुश्लिष्टशयनासनैः॥ ५.११.२० ॥

पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते।
बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः॥ ५.११.२१ ॥

मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक्।
दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि॥ ५.११.२२ ॥

शर्करासवमाध्वीक पुष्पासवफलासवाः।
वासचूर्णैश्च विविधैर्मृष्टास्तैस्तैः पृथक् पृथक्॥ ५.११.२३ ॥

सन्तता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः।
हिरण्मयैश्च कलशैर्भाजनैः स्फाटिकैरपि॥ ५.११.२४ ॥

जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता।
राजतेषु च कुम्भेषु जाम्बूनदमयेषु च॥ ५.११.२५ ॥

पानश्रेष्ठां तथा भूमिं कपिस्तत्र ददर्श सः।
सोऽपश्यच्छातकुम्भानि सीधोर्मणिमयानि च॥ ५.११.२६ ॥

तानि तानि च पूर्णानि भाजनानि महाकपिः।
क्वचिदर्धावशेषाणि क्वचित् पीतान्यशेषतः॥ ५.११.२७ ॥

क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह।
क्वचिद् भक्ष्यांश्च विविधान् क्वचित् पानानि भागशः॥ ५.११.२८ ॥

क्वचिदर्धावशेषाणि पश्यन् वै विचचार ह।
शयनान्यत्र नारीणां शून्यानि बहुधा पुनः।
परस्परं समाश्लिष्य काश्चित् सुप्तावराङ्गनाः॥ ५.११.२९ ॥

काचिच्च वस्त्रमन्यस्या अपहृत्योपगुह्य च।
उपगम्याबला सुप्ता निद्राबलपराजिता॥ ५.११.३० ॥

तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम्।
नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम्॥ ५.११.३१ ॥

चन्दनस्य च शीतस्य सीधोर्मधुरसस्य च।
विविधस्य च माल्यस्य पुष्पस्य विविधस्य च॥ ५.११.३२ ॥

बहुधा मारुतस्तस्य गन्धं विविधमुद्वहन्।
स्नानानां चन्दनानां च धूपानां चैव मूर्छितः॥ ५.११.३३ ॥

प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा।
श्यामावदातास्तत्रान्याः काश्चित् कृष्णा वराङ्गनाः॥ ५.११.३४ ॥

काश्चित् काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये।
तासां निद्रावशत्वाच्च मदनेन विमूर्छितम्॥ ५.११.३५ ॥

पद्मिनीनां प्रसुप्तानां रूपमासीद् यथैव हि।
एवं सर्वमशेषेण रावणान्तः पुरं कपिः।
ददर्श स महातेजा न ददर्श च जानकीम्॥ ५.११.३६ ॥

निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः।
जगाम महतीं शङ्कां धर्मसाध्वसशङ्कितः॥ ५.११.३७ ॥

परदारावरोधस्य प्रसुप्तस्य निरीक्षणम्।
इदं खलु ममात्यर्थं धर्मलोपं करिष्यति॥ ५.११.३८ ॥

न हि मे परदाराणां दृष्टिर्विषयवर्तिनी।
अयं चात्र मया दृष्टः परदारापरिग्रहः॥ ५.११.३९ ॥

तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः।
निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी॥ ५.११.४० ॥

कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः।
न तु मे मनसा किञ्चिद् वैकृत्यमुपपद्यते॥ ५.११.४१ ॥

मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्॥ ५.११.४२ ॥

www.prapatti.com

नान्यत्र हि मया शक्या वैदेही परिमार्गितुम्।
स्त्रियो हि स्त्रीषु दृश्यन्ते सदा सम्परिमार्गणे॥ ५.११.४३ ॥

यस्य सत्त्वस्य या योनिस्तस्यां तत् परिमार्गते।
न शक्यं प्रमदा नष्टा मृगीषु परिमार्गितुम्॥ ५.११.४४ ॥

तदिदं मार्गितं तावच्छुद्धेन मनसा मया।
रावणान्तःपुरं सर्वं दृश्यते न च जानकी॥ ५.११.४५ ॥

देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान्।
अवेक्षमाणो हनुमान् नैवापश्यत जानकीम्॥ ५.११.४६ ॥

तामपश्यन् कपिस्तत्र पश्यञ्श्चान्या वरस्त्रियः।
अपक्रम्य तदा वीरः प्रस्थातुमुपचक्रमे॥ ५.११.४७ ॥

स भूयः सर्वतः श्रीमान् मारुतिर्यत्नमाश्रितः।
आपानभूमिमुत्सृज्य तां विचेतुं प्रचक्रमे॥ ५.११.४८ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकादशः सर्गः॥

www.prapatti.com